CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

DAŚARŪPAKAVIVARAṆA

Dr. A. K. PANDEY

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

DAŚARŪPAKAVIVARAṆA

दशरूपकविवरणम्

Edited with Introduction and Notes

By

Dr. A. N. Pandey

Professor and Head

Department of Sanskrit

Kashi Vidyapith, Varanasi

सम्पादकः

डॉ० अमरनाथपाण्डेयः

आचार्यो विभागाध्यक्षश्च

संस्कृतविभागः

काशीविद्यापीठम्, वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Publisher :
Ashutosh Pandey
60, Teacher's Colony
Kashi Vidyapith, Varanasi

© A. N. Pandey

First Edition, December 1981

Price : Rs. 1-20

Printer :
Deva Vani Press
Maldahiya
Varanasi

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रस्तावना

अत्र दशरूपकविवरणं प्रकाश्यते। 'Govt. Oriental Mss. Library, Madras' इत्यत्र वर्त्तमानाया मातृकायाः(सं०१२८९२)प्रतिलिपिरस्याधारभूता। तामाश्रित्य मया सम्पादितमिदं विवरणम्। विवरणं कदा केन विरचितमिति निर्देशो नोपलभ्यते। विवरणकारो दशरूपकं रसार्णवसुधाकरं प्रतापरुद्रीयं चानुसरति। तद्यथा—'भावाश्रयं तु नृत्यं स्याद्नृत्तं ताललयाश्रयम्। मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः॥' इति विवरणम्, 'अन्यद् भावाश्रयं नृत्यं नृत्तं ताललयाश्रयम्। मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः॥' (१।९-१०) इति च दशरूपकम्। 'रंगनेपथ्यसंस्थायिपात्रसल्लापविस्तरैः। आदौ केवलमङ्कस्य कल्पिता खण्डचूलिका॥ प्रवेशनिर्गमप्राप्तेरियमङ्काद्बहिर्गता।' इति दशरूपकविवरणे रसार्णवसुधाकरे (३।१८५-१८६) चोपलभ्यते। 'भारतीवृत्तिभूयिष्ठशौर्यसौभाग्यसंस्तवैः। सूच्येते वीरशृङ्गारौ विटेन निपुणोक्तिना॥ कल्पितेनेतिवृत्तेन धूर्तचारित्रवर्णनम्। एकाङ्को मुखनिर्वाहौ यत्र भाणः स सम्मतः॥' इति विवरणे प्रतापरुद्रीये (नाटकप्रकरणम् ३७) चोपलभ्यते। विवरणकारः प्रतापरुद्रीयस्य प्रायशोऽनुसरणं करोति। रसार्णवसुधाकरकारस्य शिङ्गभूपालस्य कालश्चतुर्दशशताब्दी विद्यते। प्रतापरुद्रीयकारो विद्यानाथः प्रतापरुद्रदेवस्य (१२६८-१३२८ई०) सभामलञ्चकार। अतो विवरणकारस्य विद्यानाथपश्चाद्भावित्वं सिद्धयति। एतस्मात्पञ्चदशशताब्दी षोडशशताब्दी वा विवरणकारस्य काल इत्यनुमातुं शक्यम्। कस्येयं कृतिरिति तूल्लेखाभावे निश्चेतुं न शक्यते।

'New Catalogus Catalogorum' (अष्टमो भागः, पृ.३५१) इत्यत्र दशरूपकं प्रतापरुद्रीयस्य नाटकप्रकरणमस्तीत्युल्लेखः प्राप्यते। अयमुल्लेखः प्रामादिक एवेति परीक्षणेनोन्मील्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'इतिहासनिबन्धनं प्रख्यातम्। कविकल्पितमुत्पाद्यम्। संकरायत्तं मिश्रम्।' इति प्रतापरुद्रीये (नाटकप्रकरणे) उपलभ्यते।'इतिहास-निबद्धं यत्प्रख्यातं तदुदाहृतम्। कविकल्पितमुत्पाद्यं मिश्रं संकीर्णमुच्यते।।' इति कारिकायां स एव विषयो निबद्धः। एवं प्रतापरुद्रीये (नाटक-प्रकरणे) गद्यरूपेण 'नाटके हि प्रख्यातमितिवृत्तम्। धीरोदात्तो नायकः। शृङ्गारवीररसयोरन्यतरस्य प्राधान्यम्। अन्येषां रसाङ्गा-नामङ्गत्वेनानुप्रवेशः।' इति प्राप्यते। तदेव वस्तु 'प्रख्यातमितिवृत्तं स्याद् यत्रोदात्तो हि नायकः। शृङ्गारवीरयोरन्यतरप्राधान्यमुच्यते।। इतरेषां रसानां स्यादङ्गत्वेन प्रवेशनम्। एतन्नाटकमित्युक्तं नाट्यशास्त्र-विशारदैः।।' इति विवरणे (७-८) ग्रथितम्। विषयविवेचनक्रमेऽपि भेदः। एवं प्रतापरुद्रीयस्य नाटकप्रकरणमेव दशरूपकविवरणमित्युक्तिर्न समोचीना।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशरूपकविवरणम्

चतुर्विधैरभिनयैः सात्त्विकाङ्गिकपूर्वकैः ।
धीरोदात्ताद्यवस्थानुकृतिर्नाट्यं रसाश्रयम् ॥१॥
भावाश्रयं तु नृत्यं स्याद् नृत्तं ताललयाश्रयम् ।
मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः ॥२॥
लास्यताण्डवभेदेन नाटकाद्युपकारकम् ।

तेन नाट्येन दशरूपकाणि भवन्ति ।

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ॥३॥
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ।

रूपयति दर्शयति रसादिकमिति रूपकम् । नाट्याश्रयत्वेन तेषां नाभेदशङ्का ।

वस्तुनेतृरसास्तेषां रूपकाणां हि भेदकाः ॥४॥
वस्तु च त्रिविधं प्रोक्तं प्रख्यातोत्पाद्यमिश्रतः ।
इतिहासनिबद्धं यत्प्रख्यातं तदुदाहृतम् ॥५॥
कविकल्पितमुत्पाद्यं मिश्रं सङ्कीर्णमुच्यते ।
वस्तुनेतृरसा एव भिन्ना रूपकभेदकाः ॥६॥
प्रख्यातमितिवृत्तं स्याद् यत्रोदात्तो हि नायकः ।
शृङ्गारवीरयोरन्यतरप्राधान्यमुच्यते ॥७॥
इतरेषां रसानां स्यादङ्गत्वेन प्रवेशनम् ।
एतन्नाटकमित्युक्तं नाट्यशास्त्रविशारदैः ॥८॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदुक्तम्—

प्रख्यातवस्तुविषयं सर्ववृत्तिरसाश्रयम् ।
शृङ्गारवीरयोरन्यतरप्राधान्यशोभितम् ॥९॥

प्रकृत्यवस्थासन्ध्यङ्गपताकास्थानकादिमत् ।
तन्नायकस्तु विज्ञेयः शृङ्गारी वाथ वीर्यवान् ॥१०॥

तयोर्लक्षणम्—

स्थिरानुरागः सुभगः[1] कलाभिज्ञो विलासवान् ।
चतुरः कामतन्त्रेषु शृङ्गाररसनायकः ॥११॥

नेता वीरश्च विक्रान्तस्तेजोगाम्भीर्यमानवान् ।
सततं युद्धसन्नद्धो वीरनायक उच्यते ॥१२॥

प्रोक्तं प्रकरणे वृत्तमुत्पाद्यं धीरशान्तकः ।
नेता रसस्य प्राधान्यं शृङ्गारस्यैव सम्मतम् ॥१३॥[2]

भाणे धूर्तविटः प्रोक्तो नेता शृङ्गारवीरयोः ।
सूचनामात्रसारत्वं वृत्तमुत्पाद्यमुच्यते ॥१४॥

कल्प्यं प्रहसने कल्प्यं वृत्तं हास्यरसो मतः ।
पाषण्डतापसप्रख्या नायकाः परिकीर्तिताः ॥१५॥

तन्नायकस्तु—

चाञ्चल्यवाक् पुरोभागी हर्षासूयाविवर्धनः ।
परिहासक्रियादक्षो वागीशो हास्यनायकः ॥१६॥

डिमे प्रख्यातवृत्तं स्याद् देवगन्धर्वराक्षसाः ।
नेतारः स्युः पिशाचाद्याः षोडशैव प्रतिष्ठिताः ॥ १७ ॥

---

१. 'सुभ····' इति मातृका ।

२. कारिकानन्तरं 'तन्नायकलक्षणमुक्तम्' इत्यंशो मातृकायामुपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीरनाम्नो रसस्यैव प्राधान्यं परिकीर्त्यते ।[१]
हास्यशृङ्गारयोश्चानुप्रवेशः कथितो बुधैः ॥१८॥

प्रख्यातमितिवृत्तं स्यान्नेता धीरोद्धतो रसः ।
वीरप्रधानो व्यायोगः कथितः सर्वसम्मतः ॥१९॥

प्रोक्तं समवकारे तु वृत्तं कल्पितमिष्यते ।
नेतारो देवदैत्याद्या द्वादशैवोपयोगिनः ॥२०॥

वीरो रसः प्रधानं स्यात् प्रख्यातं वस्तु वा भवेत् ।
वीथ्यां धूर्तविटो नेता कल्पितं वस्तु युज्यते ॥२१॥

रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम् ।
अङ्के प्रख्यातवृत्तं स्याद् रसस्तु करुणो मतः ॥२२॥

नेतारः प्राकृता मर्त्याः कथ्यन्ते नाट्यवेदिभिः ।

तन्नायकस्तु—

चिन्तादैन्यसमापन्नः जडचित्तो प्रतापवान् ॥२३॥
विस्तृतः प्राप्तनिर्वेदो योऽसौ करुणनायकः ।

प्रसङ्गात् सर्वरसनायकाः कथ्यन्ते—

हर्षामर्षान्वितः सर्वदुर्वारो गर्वदुर्वहः ॥२४॥
चलचित्तो महोत्साहः कथ्यते रौद्रनायकः ।
अव्यक्तवचनो दीनो मोहदाहत्वरान्वितः ॥२५॥

स्वेदवेपथुसंयुक्तः स्याद्भयानकनायकः ।
मधुमांसविलिप्ताङ्गो भयापस्मारभोगवान् ॥२६॥

कालाभीलो मदोन्मत्तो बीभत्सरसनायकः ।
आवेगजडतामोहामर्षस्मरणविस्मयान् ॥२७॥

---

१. '....परिकीर्त्यते ' इत्यनन्तरं 'तन्नायकलक्षणमुक्तम्' इत्यंशो मातृकायामुपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गाहमानः परवशः कथ्यतेऽद्भुतनायकः।
जितेन्द्रियो जितक्रोधः संयुक्तः सात्त्विकादिभिः ॥२८॥

सदानन्दस्तत्त्ववेदी धीरोऽसौ शान्तनायकः।
एषु च द्विविधौ प्रोक्तौ नायकप्रतिनायकौ ॥२९॥

किञ्चिदूनगुणो दुःखी प्रियस्तस्योपनायकः।

यथा सुग्रीवादयः।

व्यसनी पापकृद् द्वेष्यो नेता स्यात्प्रतिनायकः ॥३०॥

यथा रावणादयः।

प्रख्यातमेवेतिवृत्तं नाटके विनियोजयेत्।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥३१॥

अर्थावस्था इति प्रोक्ताः पञ्चैता वृत्तवेदिभिः।

अथ प्रकृतिपञ्चकम्—

बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः ॥३२॥
अर्थप्रकृतयः पञ्च

सन्धिलक्षणमाह—

एषां द्वे द्वे यथाक्रमम्।
प्रकृत्यवस्थे मिलिते सन्धिरित्युच्यते बुधैः ॥३३॥

एककार्यान्वितानां तु कथांशानां प्रकीर्तितः।
अवान्तरार्थसम्बन्धः सन्धिस्ते पञ्चधेरिताः ॥३४॥

सन्धिं विभजते—

मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिः।
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥३५॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आरम्भबीजयोः सन्धिर्वै मुखसन्धिरीर्यते[1] ।
बिन्दुप्रयत्नयोः सन्धिरुक्तः प्रतिमुखाह्वयः ॥३६॥
उक्तः[2] पताकाप्राप्त्याशायोगः स्याद् गर्भसन्धिकः ।
प्रकरीनियताप्त्योस्तु विमर्शः सन्धिरन्वयः ॥३७॥
कार्यस्य च फलप्राप्तेः सन्धिर्निर्वहणो मतः ।

निर्वहणोपसंहृतिशब्दौ पर्यायौ ।[3] मुखसन्धिस्वरूपम्—

मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवात् ॥३८॥

अस्याङ्गानि सूचयति—

अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ।
उपक्षेपः परिकरः परिन्यासो विलोभनम् ॥३९॥
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
उद्भेदभेदकरणानीति द्वादश योजयेत् ॥४०॥[4]

प्रतिमुखसन्धिमाह—

लक्ष्यालक्ष्यस्य बीजस्य व्यक्तिः प्रतिमुखं मतम् ।
बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ॥४१॥

यथा—

विलासः परिसर्पश्च विधूतं शमनर्मणी ।
नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम् ॥४२॥
वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि ।

गर्भसन्धिमाह—

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ॥४३॥

---

१. 'विमुख····' इति मातृका । २. 'उक्ता' इति मातृका ।
३. '·····पर्यायौ ।' इत्यनन्तरम् 'अर्थप्रकृतयश्चोदाहरणसमय एव निरूपयिष्यन्ते' इत्यंशो मातृकायामुपलभ्यते ।
४. कारिकानन्तरं 'तेषां स्वरूपमग्रे वक्ष्यते' इत्यंशो मातृकायामुपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वादशाङ्गः पताकाया योगात् प्राप्तेस्तु सम्भवः ।

प्राप्तिः प्राप्त्याशा ।

अभूताहरणं मार्गो रूपोदाहरणे क्रमः ॥४४॥

सङ्ग्रहश्चानुमानं च तोटकाधिबले तथा ।
उद्वेगसम्भ्रमाक्षेपा द्वादशाङ्गान्यनुक्रमात् ॥४५॥[१]

विमर्शसन्धिमाह—

गर्भसन्धौ प्रसिद्धस्य बीजार्थस्यावमर्शनम् ।[२]
हेतुना येन केनापि विमर्शः सन्धिरिष्यते ॥४६॥

प्रकरीनियताप्त्युक्तेरङ्गान्यस्य त्रयोदश ।
अथापवादसम्फेटौ विद्रवद्रवशक्तयः ॥४७॥

द्युतिः प्रसङ्गश्चलनं व्यवसायो निरोधनम् ।
प्ररोचना विचलनमाधानं च त्रयोदश ॥४८॥

निर्वहणसन्धिमाह—

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं मतम् ॥४९॥

मुखाद्यर्था इति । मुखसन्ध्यादीनामर्था इत्यर्थः ।

चतुर्दशाङ्गान्यस्यैव कार्येष्टागमयोगतः ।
सन्धिर्निरोधो ग्रथनं निर्णयः परिभाषणम् ॥५०॥

प्रसादानन्दसमयाः कृतिर्भावोपगूहने ।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥५१॥[३]

---

१. कारिकानन्तरम् 'एषां स्वरूपमग्रे वक्ष्यते' इत्यंशो मातृकायामुपलभ्यते ।
२. 'बीजस्यार्थविमर्शनम्' इति मातृकायाम् ।
३. कारिकानन्तरं 'तल्लक्षणान्यग्रे वक्ष्यन्ते । एषामुपक्षेपादीनाम्' इत्यंशो मातृकायामुपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उक्त्युद्भेदसमाधानोपक्षेपाणां प्रकीर्तितम् ।
परिन्यासस्य च तथा तथा परिकरस्य च ॥५२॥

अवश्यकत्वमेतेषामङ्गानामाद्यसन्धिके ।
यथासम्भवमन्येषां प्रयोगः कविसम्मतः ॥५३॥

प्रतिमुखसन्धौ प्रगमनवज्रोपन्यासपुष्पाणाम् ।
परिसर्पस्य च कथयन्त्यावश्यकभावमभियुक्ताः ॥५४॥

अभूताहरणं मार्गस्तोटकोदाहृती तथा ।
आक्षेपाधिबले चेति प्रोक्तान्यङ्गानि सूरिभिः ॥५५॥

अवश्यकानि सन्धौ तु गर्भाख्ये नाटचवेदिभिः ।
विमर्शसन्धावाधानव्यवसायप्ररोचनाः ॥५६॥

शक्तिश्चावश्यकान्येतान्यङ्गानि कथितानि हि ।
चतुर्दशापि युक्तानि सन्धौ निर्वहणाह्वये ॥५७॥

अङ्गानां रूपके केऽपि क्रमं नेच्छन्ति सूरयः ।
इति तस्य महार्हस्य नाटकस्य महात्मभिः ॥५८॥

चतुःषष्टयङ्गसहिताः कीर्तिताः पञ्चसन्धयः ।

प्रयोजनानि षडेवैतेषां भवन्ति ।

अङ्गानां विवक्षितार्थप्रतिपादनम्, (गोप्यार्थंगोपनम्[१]) प्रकाश्यार्थं-प्रकाशनम्, अभिनयरागसमृद्धिः, चमत्कारकारित्वमितिवृत्तविस्तरश्चेति । इतिवृत्तं वस्तु ।

नाटके द्विविधं वस्तु सूच्यासूच्यप्रभेदतः ॥५९॥

रसहीनं भवेद् यत्तु तत् सूच्यमिति कथ्यते ।
यदस्ति नीरसं वस्तु सूचयेत् सूचकास्त्वमी ॥६०॥

---

१. मातृकायां नोपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र—

सूच्यस्य सूचनोपायाः पञ्चधा परिकीर्तिताः ।
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकाः ॥६१॥

नामक्रमे विवक्षातो[1] यथासम्भवमीरिताः ।
अमुख्यपात्ररचितः सङ्क्षेपैकप्रयोजकः ॥६२॥

स शुद्धो मिश्र इत्युक्तो मिश्रः स्यान्न तु मध्यमैः ।
सोऽयं चेटनटाचार्यसल्लापः परिकीर्तितः ॥६३॥

शुद्धः केवलमध्योऽयमेकानेककृतो द्विधा ।
शुद्धस्तु संस्कृतप्रायो मिश्रः प्राकृतमिश्रितः ॥६४॥

अथ चूलिका—

वन्दिमागधसूताद्यैः प्रतिसीरान्तरस्थितैः ।
अर्थोपक्षेपणं यत्र क्रियते सा हि चूलिका ॥६५॥

चूलिका खण्डयुक्ता सा द्विविधा परिकीर्त्यते ।

खण्डयुक्ता खण्डचूलिकेत्यर्थः ।

पात्रैर्यवनिकान्तःस्थैः केवलं या तु निर्मिता ॥६६॥

आदावङ्कस्य मध्ये च चूलिका परिकीर्तिता ।
प्रवेशनिर्गमाभावादियमङ्काद् बहिर्गता ॥६७॥

रङ्गनेपथ्यसंस्थायिपात्रसल्लापविस्तरैः ।
आदौ केवलमङ्कस्य कल्पिता खण्डचूलिका ॥६८॥

प्रवेशनिर्गमप्राप्तेरियमङ्काद् बहिर्गता ।

अङ्कास्यः—

पूर्वाङ्कान्ते सम्प्रविष्टैरुत्तराङ्कार्थसूचनम् ॥६९॥

---

१. 'विपक्षास्ते' इति मातृकायाम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अविभागेन सर्वेषां भाविन्यङ्के प्रवेशनम् ।
पात्रेणाङ्कं प्रविष्टेन केवलं सूचितत्वतः ॥७०॥

भवेदङ्कादबाह्यत्वमङ्कास्याङ्कावतारयोः ।
यत्र स्यादुत्तराङ्कार्थः पूर्वाङ्कार्थानुषङ्गतः ॥७१॥

असूचिताङ्कपात्रं तदङ्कावतरणं मतम् ।
यन्नीचैः केवलं पात्रैर्भाविभूतार्थसूचना ॥७२॥

अङ्क्योरुभयोर्मध्ये स विज्ञेयः प्रवेशकः ।
असूच्यं तु शुभोदात्तरसभावनिरन्तरम् ॥७३॥

असूच्यं तद् द्विधा दृश्यं श्राव्यं चाद्यं तु दर्शयेत् ।
द्विधा द्वितीयं स्वगतं प्रकाशं चेति भेदतः ॥७४॥

स्वगतं स्वेन विज्ञेयं प्रकाशञ्च द्विधा भवेत् ।
सर्वप्रकाशं नियतप्रकाशं चेति भेदतः ॥७५॥

सर्वप्रकाशं सर्वेषां स्थितानां श्रवणोचितम् ।
द्वितीयं तु स्थितेष्वन्येष्वेकस्य श्रवणोचितम् ॥७६॥

त्रिधा जनान्तमपवारितमाकाशभाषितम् ।
त्रिपताकाकरेणान्य[1]मपवार्यान्तिरा कथाम् ॥७७॥

अन्यस्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ।
रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ॥७८॥

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम् ॥७९॥

सूच्यं तु सूचयित्वैवं दृश्यमङ्कैः प्रदर्शयेत् ।

अङ्कस्वरूपं निरूप्यते—

प्रत्यक्षनेतृचरितो विन्दुव्यक्तिपुरस्कृतः ॥८०॥

१'.....णास्यम.....' इति मातृकायाम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अङ्को नानाप्रकारार्थसंविधानरसाश्रयः ।
प्रयुक्तः पञ्चषैः पात्रैस्तेषामङ्के च निर्गमः ॥८१॥

तदङ्गमामुखं निरूप्यते—

सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥८२॥

प्रस्तावना वा तत्र स्यात् कथोद्घातः प्रवर्तकः ।
प्रयोगातिशयश्चेति त्रीण्यङ्गान्यामुखस्य हि ॥८३॥

सूत्रधारलक्षणम्—

आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः ।
रङ्गप्रसाधनप्रौढः सूत्रधार इतीरितः ॥८४॥

नटीलक्षणम्—

चतुरातोद्यभेदज्ञा तत्कलासु विशारदा ।
करणाभिनयज्ञा च सर्वभाषाविचक्षणा ॥८५॥
नटानुयोक्त्री नृत्येषु नटस्य गृहिणी नटी ।

मारिषः परिपार्श्वगः । तल्लक्षणं तु—

भरतेनाभिनीतं यो भावं नानारसाश्रयम् ॥८६॥
परिष्करोति पार्श्वस्थः स भवेत् पारिपार्श्वकः ।

विदूषकलक्षणम्—

तदात्वप्रतिभो नर्मचतुर्भावप्रयोगवित् ॥८७॥
वेदविन्नर्मवादी यो नेतुः स स्याद् विदूषकः ।

सूत्रधारकार्यमाह—

निवेदनं प्रयोज्यस्य निर्देशो देशकालयोः ॥८८॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काव्यार्थसूचकैः सूक्तैः सभायाश्चित्तरञ्जनम् ।
कविकाव्यनटादीनां प्रशंसा तु प्ररोचना ॥८९॥

आमुखाङ्गत्रयं निरूप्यते—

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूरिणः ।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः ॥९०॥

प्रस्तूयमानकालानुकूलवर्णनया[1] स्वतः ।
प्रविशेत् सूत्रितं पात्रं यत्र तत् स प्रवर्तकः ॥९१॥

एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।
पात्रप्रयोगो यत्रायं प्रयोगातिशयो मतः ॥९२॥

नटादीनां स्थलस्वरूपम्—

कुशीलवकुटुम्बस्य स्थलं नेपथ्यमिष्यते ।
नेपथ्यजं तु नैपथ्यं तच्चतुर्विधमिष्यते ॥९३॥

पुस्तभूषाङ्गरचनासञ्जीवा इति भेदतः ।
पुस्तं प्रदर्शितं नाट्ये विमानाद्रिवनादिकम् ॥९४॥

कुण्डलादिषु भूषाङ्गरचना त्वनुलेपनम् ।
सञ्जीवः पशुपक्ष्यादिप्राणिनां रूपधारणम् ॥९५॥

वीथ्यङ्गान्यामुखाङ्गत्वात् कथ्यन्तेऽत्र स्वरूपतः ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते[2] छलम् ॥९६॥

वाक्केल्यधिबलं गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥९७॥

तेषां न्यासो विवक्षातः सर्वतो लास्यवेदिना ।

तेषां मध्ये यथासम्भवं प्रस्तावनायां कानिचित् प्रयोज्यानि ।

प्रस्तावनाङ्गध्रुवा नान्दीस्वरूपं निरूप्यते ॥९८॥

---

१. '....कालस्यानु' इति मातृका । २. 'उभयात्यका.....' इति मातृका ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूचनी पात्रभेदानां रसभावप्रकाशिनी ।
या गीतिः सा ध्रुवा तुल्यसंविधानविशेषणा ॥९९॥

तुल्यसंविधाना तुल्यविशेषणा चेत्यर्थः । नान्दीलक्षणमाह—

प्रारम्भे सर्वनाट्यानां नान्दी कार्या शुभावहा ।
आशीर्नमस्क्रियावस्तुनिर्देशान्यतमात्मिका ॥१००॥

अर्थतः शब्दतो वापि मनाक् काव्यार्थसूचना ।
चन्द्रनामाङ्किता प्रेयोमङ्गलार्थपदोज्ज्वला ॥१०१॥

शङ्खचक्रसिताम्भोजकोककैरवशंसिनी ।
यथैव चन्द्रसम्बन्धो लक्ष्यते व्यज्यतेऽपि वा ॥१०२॥

नान्दी श्लोके तथा यत्नः कर्त्तव्यः कविभिः सदा ।
युक्ताष्टभिर्द्वादशभिरष्टादशभिरेव वा ॥१०३॥

द्वाविंशत्या पदैर्वापि सा नान्दी परिकीर्त्यते ।

महावीरचरितेऽष्टपदा नान्दी, उत्तरचरिते द्वादशपदा नान्दी, बाल-रामायणे द्वाविंशतिपदा नान्दी । एवमष्टादशपदापि द्रष्टव्या ।

केचित् तु नानुमन्यन्ते पदानां नियमं बुधाः ॥१०४॥

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तेषामवश्यकर्तव्या नान्दी नन्दीश्वरप्रिया ॥१०५॥

पूर्वरङ्गस्वरूपं च—

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स कीर्तितः ॥१०६॥

नान्द्यनन्तरं कर्तव्यमाह—

रङ्गं प्रसाध्य मधुरैः वाक्यैः काव्यार्थसूचकैः ।
निरुक्तपदनान्दीभिः सूत्रधारे विनिर्गते ॥१०७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रविश्य तद्वदपरः ततः पञ्चपदीं व्रजेत् ।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥१०८॥
नाटकस्यैव मुख्यैषा प्रक्रियेति बुधा जगुः ।
प्रसन्नपदगम्भीरसंस्कृतेनेव योजिता ॥१०९॥
भारतीवृत्तिरिति तां विदुर्नाट्यविशारदाः ।

अथ नाटके वर्ज्यानि—

दूराध्वानं तथा युद्धं राज्यदेशाद्युपद्रवम् ॥११०॥
संरोधं भोजनं स्नानं सुरतं चानुलेपनम् ।
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् ॥१११॥

तदुपयुक्तानां षण्णां भाषाणामपि विनियोगः ।

पाठ्यन्तु संस्कृतं नृणामनीचानां महात्मनाम् ।
स्त्रीविदूषकशूद्राणां नियतं प्राकृतं वचः ॥११२॥

एवं भाषापञ्चकस्यापि विनियोगो द्रष्टव्यः । अथ दशरूपकविवरणम्—

साङ्गैर्मुखप्रतिमुखगर्भमर्शोपसंहृतैः ।
पूर्णप्रकृतिमन्येषामाधिकारिकवृत्तिमत् ॥११३॥
वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते ।
प्रख्यातनायकोपेतं नाटकं तदुदाहृतम् ॥११४॥

अथ प्रकरणम्—

उत्पाद्येनेतिवृत्तेन धीरशान्तप्रधानकम् ।
शेषं नाटकतुल्याङ्गं भवेत् प्रकरणं हि तत् ॥११५॥

अथ भाणः—

भारतीवृत्तिभूयिष्ठशौर्यसौभाग्यसंस्तवैः ।
सूच्येते वीरशृङ्गारौ विटेन निपुणोक्तिना ॥११६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कल्पितेनेतिवृत्तेन धूर्तचारित्रवर्णनम् ।
एकोऽङ्को मुखनिर्वाहौ यत्र भाणः स सम्मतः ॥११७॥

अथ प्रहसनम्—

यत्र सन्ध्यङ्गवृत्त्यङ्गवर्णनं भाणवन्मतम् ।
हास्यो रसः प्रधानं स्याद् भवेत् प्रहसनं हि तत् ॥११८॥

सङ्कीर्णं वैकृतं शुद्धमिति तत्त्रिविधं मतम् ।
यद् वीथ्यङ्गैः समाकीर्णं सङ्कीर्णं धूर्तसङ्कुलम् ॥११९॥

कामुकादिवचोवेषैः षण्डकञ्चुकितापसैः ।
प्रहासाभिनयप्रायं विकृतं तत्प्रकीर्त्यते ॥१२०॥

पाषण्डविप्रप्रभृतिचेटीचेटविटाकुलम् ।
वेषभाषादिसहितं वृत्तं हास्यवचोऽन्वितम् ॥१२१॥

अथ डिमः—

यत्र वस्तु प्रसिद्धं स्याद् वृत्तं यत्कैशिकीं विना ।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः ॥१२२॥

भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ।
हास्यशृङ्गाररहिता रसा रौद्रप्रधानकाः ॥१२३॥

चत्वारोऽङ्काः सन्धयश्च चत्वारो मर्शवर्जिताः ।
महेन्द्रजालसङ्ग्रामसूर्यचन्द्रग्रहादयः ॥१२४॥

शेषं नाटकवत्सर्वं स डिमः परिकीर्तितः ।

अथ व्यायोगः—

यत्र ख्यातेतिवृत्तं स्यादुद्धतो नायको मतः ॥१२५॥

गर्भाविमर्शराहित्यं डिमवद्रसपोषणम् ।
एकवासरकार्यञ्च स व्यायोगो महारणः ॥१२६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ समवकारः—

यत्रामुखं नाटकवत् सन्धयो मर्शवर्जिताः ।
नेतारो द्वादश पृथक्कृता देवासुरादयः ॥१२७॥

वीरप्रधानाश्च रसास्त्रयोऽङ्कास्त्रिषु च क्रमात् ।
वस्तुस्वभावदेवादिकृताः स्युः कपटास्त्रयः ॥१२८।

पुररोधरणाग्न्यादिनिमित्ता विद्रवास्त्रयः ।
धर्मार्थकामानुगुणास्तिस्रः शृङ्गाररीतयः ॥१२९॥

प्रथमेऽङ्के निबद्धव्या कथा यामत्रयावधिः ।
यामावधिर्द्वितीयेऽङ्के तृतीयेऽङ्केऽर्धयामिका ॥१३०॥

असौ समवकारः स्याद् वीथ्यङ्कैः कैश्चिदन्वितः ।

अथ वीथी—

यत्र भाणवदङ्कानां क्लृप्तिर्वृत्तिस्तु कैशिकी ॥१३१॥

शृङ्गारः परिपूर्णत्वात् सूचनीयोऽतिभूयसा ।
उद्घात्यादीनि चाङ्गानि सा वीथिरिति सम्मता ॥१३२॥

अथाङ्कः—

यत्रेतिवृत्तं प्रख्यातं प्रधानं करुणो रसः ।
स्त्रीणां विलापो वाग्युद्धं नेतारः प्राकृता जनाः ॥१३३॥

भाणवत् सन्धिवृत्तादि स उत्सृष्टोऽङ्कसंज्ञितः ।

अथेहामृगः—

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिकम् ॥१३४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मर्त्यदिव्यौ चानियमान्नायकप्रतिनायकौ ।
धीरोद्धतौ स्त्रियं दिव्यां हर्तुकामौ च कामुकीम् ॥१३५॥

अवधं युद्धमन्योऽन्यमाभासरसयोस्तयोः ।
प्रक्रियेयं हि सकला कलिता दशरूपके ॥१३६॥

॥ इति दशरूपकविवरणम् ॥

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

NOTES

कारिका I । The author produces this कारिका verbatum from the प्रतापरुद्रीय.

कारिका-s 2-3 : The author follows the दशरूपक, which defines the नृत्य and नृत्त as follows—

अन्यद् भावाश्रयं नृत्यं नृत्तं तालल्याश्रयम् ।

× × ×

मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः ।

लास्यताण्डवरूपेण नाटकाद्युपकारकम् ॥ —I/9-10

कारिका I8 । According to the नाट्यशास्त्र and the दशरूपक, in the Dima, the Erotic and the Comic Sentiments are omitted—

शृङ्गारहास्यवर्जितः शेषैरन्यैः समायुक्तः ।

नाट्यशास्त्र I8/79

रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः ।

दशरूपक 3/58

भोज and शिङ्गभूपाल follow भरत—

शृङ्गारहास्यवज्यं शेषैः सर्वैं रसैः समायुक्तः ।

शृङ्गारप्रकाश, प्रकाश 11, p.465.

ख्यातेतिवृत्तं निर्हास्यशृङ्गारं रौद्रमुद्धितम् ।

रसार्णवसुधाकर 3/280

The विवरण says that in the Dima, the Heroic Sentiment should predominate. The author allows अनुप्रवेश of the Comic and the Erotic Sentiments. According to Monier-Williams, अनुप्रवेश has two meanings--entrance into and imitation. In the

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

present context, the meaning 'entrance into' will not be applicable, because the authors beginning from भरत down to शिङ्गभूपाल do not allow the Comic and the Erotic Sentiments in the Dima. This is my conjecture that the correct reading is—

'शृङ्गारहास्ययोरत्राप्रवेशः कथितो बुधैः ।'

कारिका-s 11-12 : The author defines the heroes of the Erotic and the Heroic Sentiments. In the कारिका-s 25-29, he defines the heroes of the remaining Sentiments—the Pathetic, the Furious, the Frightful, the Disgustful, the Marvellous and the Quietistic.

कारिका 48 : The विवरण reads चलन in place of छलन. In other works of dramaturgy, the term छलन is found. See दशरूपक 1.44; रसार्णवसुधाकर 3.59.

The author of the विवरण reads आधान in place of आदान. The दशरूपक (1.45), the रसार्णवसुधाकर (3/60) and the नाटकलक्षणरत्नकोष (p. 80), etc. read आदान.

कारिका 50 : The विवरण reads निरोध in place of विबोध. The दशरूपक (1.49) and the साहित्यदर्पण (6.108) read विबोध. The शृङ्गारप्रकाश (प्रकाश xii, p. 525) reads निरोध and the रसार्णवसुधाकर (3.68) reads विरोध.

कारिका 54 : The विवरण says that in the Progression (प्रतिमुख सन्धि), the subdivisions प्रगमन, वज्र, उपन्यास, पुष्प and परिसर्प are essential. According to the दशरूपक, the most important subdivisions are—उपन्यास and पुष्प. The others may be employed when possible—'एतेषां च मध्ये परिसर्पप्रशमवज्रोपन्यासपुष्पाणां प्राधान्यम् । इतरेषां यथासम्भव प्रयोग इति ।'

—दशरूपक, वृत्ति under 1.36.

कारिका 55 : According to the विवरण, the essential subdivisions of the Development (गर्भसन्धि) are—अभूताहरण, मार्ग, तोटक,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदाहृति, आक्षेप and अधिबल. The दशरूपक excludes उदाहृति—एषां च मध्येऽभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यम् । इतरेषां यथासम्भव प्रयोग इति साङ्गो गर्भसन्धिरुक्तः ।'—दशरूपक, वृत्ति under 1. 42.

कारिका-s 56-57 : The विवरण says that आधान, व्यवसाय, प्ररोचना and शक्ति are essential subdivisions of the Pause (विमर्श सन्धि). The दशरूपक says that अपवाद, शक्ति, व्यवसाय, प्ररोचना and आदान are most important in the Pause—

तत्रैतेषामपवादशक्तिव्यवसायप्ररोचनादानानि प्रधानानीति ।

Page 11 : Among the six applications of the subdivisions only five are enumerated in the Ms. one--गोप्यार्थगोपन--is missing, which has been added here. The writer follows the अवलोक. The वृत्ति reads as follows—

विवक्षितार्थनिबन्धनं गोप्यार्थगोपनं प्रकाश्यार्थप्रकाशनमभिनयरागसमृद्धिश्चमत्कारित्वं च काव्यस्येतिवृत्तस्य विस्तर इत्यङ्गैः षट् प्रयोजनानि सम्पाद्यन्त इति ।

कारिका 66 : According to the विवरण, चूलिका is of two kinds-चूलिका and खण्डचूलिका. चूलिका is used either in the beginning or in the middle of the act, while खण्डचूलिका is used only in the beginning of an act. In खण्डचूलिका, a person stationed behind the curtain and another person on the stage speak to one another. The author follows the रसार्णवसुधाकर in his treatment of चूलिका. The रसार्णवसुधाकर explains चूलिका and खण्डचूलिका as follows—

पात्रैर्जवनिकान्तःस्थैः केवलं या तु निर्मिता ।
आदावङ्कस्य मध्ये वा चूलिका नाम सा स्मृता ॥
प्रवेशनिर्गमाभावादियमङ्काद् बहिर्गता ।
रङ्गनेपथ्यसंस्थायिपात्रसलँलापविस्तरैः॥
आदौ केवलमङ्कस्य कल्पिता खण्डचूलिका ।
प्रवेशनिर्गमाप्राप्तेरियमङ्काद् बहिर्गता ॥

रसार्णवसुधाकर 3/I84-86

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारिका 90 : The कारिका is produced verbatum from the प्रतापरुद्रीय (नाटकप्रकरण, 27).

कारिका 91 : See प्रतापरुद्रीय, नाटकप्रकरण, 28.

कारिका 92 : See प्रतापरुद्रीय, नाटकप्रकरण, 29.

कारिका 113 : The विवरण reads मर्श in place of अवमर्श or विमर्श. See कारिका 127 also. The term मर्श is used in the प्रतापरुद्रीय (नाटकप्रकरण, 46) also—

'यथामुखं नाटकवत् सन्धयो मर्शवर्जिताः ।'

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh